तिभुवनानिपश्यन् । सूर्यायस्वाहा । इदंसूर्याय ॥ २ ॥ देवीर्द्वारेतिदेवीम् ॥ देवीर्द्वारःइ
न्द्र ९ संघातेवीड्वीर्यामन्नवर्द्धयन् ॥ आवत्सेनतरुणेनकुमारेणचमीवतापार्वाणा ९ रुम
नं१ २५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रेणुकक्काटन्तुदंनांवस्रुवनेवसुधेयस्यव्यन्तुयज॥३॥ नमःशंभवायेतिशिवम्॥ ॐनमः शं
भवायचमयोभवायचनमःशंकरायचमयस्करायचनमःशिवायचशिवतरायच॥४॥
विष्णोरराटेतिविष्णुम्॥ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि
॥वैष्णवमसि विष्णवे त्वा॥५॥ इतिपंचायतनाः॥ ॥अथपंचलोकपालाः॥ गणानान्त्वे
तिविनायकम्॥ गणानान्त्वागणपतिँ हवामहे प्रियाणान्त्वाप्रियपतिँ हवामहे नि
धीनान्त्वानिधिपतिँ हवामहेवसोमम॥ आहमजानिगर्भधमात्वमजासिगर्भधम्
॥१॥ अम्बेअम्बिकेतिदुर्गाम्॥ अम्बेऽअम्बिकेऽम्बालिकेनमानयतिकश्चनससस्त्यश्व

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्र·स्था कः सुभद्रिकाङ्काम्पील्लवासिनीम्॥२॥ वायोर्येनेति वायुम्॥ वायोर्येने [redacted]
२६ [redacted] सहस्त्रिणोरथा शत्रेभिरागहि। नियुत्वान्सोमपीतये॥३॥ ऊर्द्धाऽ अस्येति आत्म
ज्म्। ऊर्द्धा अस्य समिधो भवन्त्यूर्द्धा शुक्राशोचीं ष्यग्नेः॥ द्युमत्तमा सुप्रतीकस्य
सूनोः॥४॥ अश्विनोर्भैषज्येनेति अश्विनीकुमारौ। अश्विनोर्भैषज्येन तेजसे ब्रह्म
वर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रि
येण बलाय श्रियै यशसे अभिषिञ्चामि॥५॥ इति पंचलोकपालाः॥ ॥अथ नवग्रह
ः॥ ॥आकृष्णेति सूर्यम्॥ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च॥ हिर

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रूपयेनसविता रथेनादेवोयातिभुवनानिपश्यतिन्॥१॥इमंदेवेतिसोमम्॥इमंदेवाअ
सपत्न॰ं सुवध्वंमहतेक्षत्रायमहते ज्यैष्ठ्यायमहते [redacted] जानराज्यायेन्द्र
स्येन्द्रियाय।इममसुष्यपुत्रममुष्यैपुत्रमस्यैविशएषवोमीराजासोमोस्माकंब्राह्म
णाना॰ंराजा॥२॥अग्निर्मूर्द्धेतिभौमंमूर्द्धादिवःककुत्पतिः पृथिव्याऽअयम्॥
रेता॰ं अपा॰ंसिजिन्वति॥३॥उद्बुध्यस्वेतिबुधम्॥उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्ते
स॰ंसृजेथामयंच।अस्मिन्सधस्थेअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत॥४॥
बृहस्पतेऽअतीतिबृहस्पतिम्।बृहस्पतेऽअतियदर्य्योऽअर्हाद्युमद्विभातिक्रतु

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्र· स्वा मज नेषु ॥ यद्दीदयद्वसः ऋतप्रजातन दस्मासुद्रविणं धेहि चित्रम् । उपयामगृहीतो
२७ सि बृहस्पतये त्वैष ते योनिर्बृहस्पतये त्वा ॥५॥ अन्नात्परिस्रुतेति स्रुकम् ॥ अन्नात्प
रिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः ॥ ऋतेन सत्यमिन्द्रियं विपा
नꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥६॥ शन्नो देवी निशानि स्वा । श
न्नो देवीरभिष्टय आपो भवन्तु पीतये ॥ शंयोरभिस्रवन्तु नः ॥७॥ कया नश्चित्रे
ति राहुम् । कया नश्चित्र आ भुवदूती सदावृधः सखा ॥ कयाश्चित्रिष्ठु याहूता ॥८॥
केतुं कृण्वन्निति केतुम् । केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे समुषद्भिरजा

२७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

२ त्र्यम्बकंयजामहेसुगन्धिम्पतिवेदनम्

यथा॥ इतिनवग्रहाः॥ ॥ अथाधिदेवताः॥ त्र्यम्बकमितीश्वरम्। त्र्यम्बकंयजामहेसु
गन्धिम्पुष्टिवर्द्धनम्। उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्। उर्वारुकमिवबंध
नादितोमुक्षीयमामुतः॥ १॥ श्रीश्चतेइति उमाम्॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपा
र्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम्। इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण॥
२॥ यदक्रन्दइतिस्कन्दम्। यदक्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवापुरीषात्
। श्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यम्महिजातन्तेऽअर्वन्॥ ३॥ विष्णोरराटमितिविष्णु
म्। विष्णोरराटमसिविष्णोश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि। वैष्णवमसिविष्णवे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ॰स्था त्वा॥४॥ ब्रह्मजज्ञानमिति ब्रह्माणम्॥ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेन
२८ आवः बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥५॥ त्रातारमिन्द्रमिती
न्द्रम्। त्रातारमिन्द्रमवितारमिन्द्र ७ हवेहवे सुहव ७ शूरमिन्द्रम्। ह्वयामि शक्रं पुरु
हूतमिन्द्र ७ स्वस्ति नो मघवा धात्विन्द्रः॥६॥ यमाय त्वेति यमम्। यमाय त्वा मखाय
त्वा सूर्यस्य त्वा तपसे देवस्त्वा सविता मध्वानक्तु पृथिव्याः स ७ स्पृशस्पाहि। अर्चिरसि शो
चिरसि तपोसि॥७॥ कार्षिरसीति कालं। कार्षिरसि समुद्रस्य त्वाक्षित्या उन्नयामि। स
मापो अद्भिरग्मत समोषधीः॥८॥ विश्वावसोऽइति विश्वगुप्तम्। विश्वावसो स्वस्तिनेपार

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मसीय॥९॥इन्द्रमधिदेवता:॥ ॥अथप्रत्यधिदेवता:॥ ॥अग्निन्दूतमित्यग्निम्॥
॥ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे देवाँ२ ॥ऽआसादयादिह॥१॥अप्स्वग्न इत्य
प:।अप्स्वग्नेसधिष्टवसौषधीरनुरुध्यसे।गर्भेसंजायसेपुन:॥२॥स्योनापृथिवी
तिपृथिवीम्।स्योनापृथिविनोभवान्नृक्षरानिवेशनी।यच्छान:शर्मसप्रथा:॥३॥
इदंविष्णुरितिविष्णुम्।इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्।समूढमस्यपाँ
सुरेस्वाहा॥४॥सजोषाइन्द्रेतिइन्द्रम्॥सजोषाऽइन्द्र:सगणोमरुद्भि:सोमम्पिब·

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ब्र·स्था त्वहाश्रुराविद्वान्।जहिशत्रूँ १॥२ यमृधोनुदस्वाथाभयङ्कृणुहिविश्वतोनः।उपयामगृही
२९ तोसीन्द्रायत्वामरुत्वतऽएषतेयोनिरिन्द्रायत्वामरुत्वते॥५॥ अदित्यैरास्नासीतीन्द्रा(
णीमृ॥ अदित्यैरास्नासीन्द्राण्याऽउष्णीषःपूषासिघर्मायदिष्व॥६॥ प्रजापतेनेतिप्रजा
पतिम्।प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव।यत्कामास्तेजुहुमस्त
नोअस्त्वयममुष्यपितासावस्यपितावयं स्यामपतयोरयीणां स्वाहा।रुद्रय
त्तेक्रिविपरंनामतस्मिन्हुतमस्यमेष्टमसिस्वाहा॥७॥ नमोस्तुसर्पेभ्यइतिसर्पम्॥न
मोस्तुसर्पेभ्योयेकेचपृथिवीमनु।येऽअन्तरिक्षेयेदिवितेभ्यःसर्पेभ्योनमः॥८॥ ब्रह्म(रुद्रः
२८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जज्ञानमिति ब्रह्माणम्। ब्रह्मजज्ञानम्प्रथमंपुरस्ताद्विसीमतः सुरुचोवेनऽआवः
॥सबुध्न्याउपमाअस्यविष्ठाः सतश्चयोनिमसतश्चविवः॥१॥ इतिप्रत्यधिदेवताः॥
अथदिक्पालाः॥ ॥त्रातारमिन्द्रमितीन्द्रम्॥ त्रातारमिन्द्रमवितारमिन्द्र ९ हवेहवेसुव
हव ९ शूरमिन्द्रम्ह्वयामिशक्रंपुरुहूतमिन्द्र ९७ स्वस्तिनोमघवाधात्विन्द्र ४॥१॥
अग्निंदूतमितिअग्निम्॥ अग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवे। देवाँ॥ऽआसादयाऽ
दिह॥२॥ यमायत्वेतियमम्॥ यमायत्वामखायत्वासूर्यस्यत्वातपसेदेवस्त्वासविता
मध्वानक्तुपृथिव्याः स ९७ स्पृशस्पाहि। अर्चिरसिशोचिरसितपोसि॥४॥ अप्स्वेतिनि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ॰ स्था॰ ओतिम् । असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ॥ अन्यमस्मदि
३० च्छसा त इत्यां नमो देवी निर्ऋते तुभ्यमस्तु ॥५॥ वरुणस्योत्तम्भनमिति वरुणम् । वरुण
स्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऽऋतसदन्यसि वरुणस्य ऽऋत
सदनमसि वरुणस्य ऽऋतसदनमा सीद ॥६॥ वायो ये ते ति वायुम् ॥ वौंतोवामनोवाग
धर्वाः सप्त विः शांति: ॥ ते ऽअग्रेऽश्वमयुञ्जं स्ते ऽअस्मिञ्जवमादधुः ॥७॥ सोमो धेनुमि
ति सोमम् । सोमो धेनुं सोमो ऽअर्वन्तमाशुं सोमो वीरं कर्मण्यन्ददाति । सादन्यं विद
थ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ॥८॥ तमीशानमिति शानम् ॥ तमीशानञ्जगत से॰ रु॰ ३०
४ वायो ये ते सहस्रिणो रथासस्तेभिरा गहि ॥ नियुत्वान्त्सोमपीतये ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्तस्थुषस्पतिं धियंजिन्वमवसेहूमहेवयम्।।पूषानोयथावेदसामसद्वृधेरक्षितापायुर
दब्धःस्वस्तये॥८॥ब्रह्मजज्ञानमितिब्रह्मणाम्॥ब्रह्मजज्ञानम्प्रथमंपुरस्ताद्विसीमतःसुरु
चोवेनआवः॥सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः॥१०॥सहस्रशीर्षेति
अनन्तम्॥सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात्।सभूमिं॰सर्वतस्पृत्वात्यतिष्ठद्द
शाङ्गुलम्॥११॥इतिदिक्पाला॥ ॥अथध्रुवाद्यष्टवसुहोम॥सुगावोदेवाःसदना
अकर्मयआजग्मेदं॰सवनञ्जुषाणा।भरमाणावहमानाहवीं॰ष्यस्मेधत्तवसवोव
सूनिस्वाहा॥ध्रुवाद्यष्टवसुभ्यःस्वाहा॥१॥यज्ञोदेवानां॰प्रत्येतिसुम्नमादित्यासोभ

ध्रुवोधरश्चसोमश्चआपश्चैवानलोनिलः।।प्रत्युषश्चप्रभासश्चवस
वोष्टौप्रकीर्तिताः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वीरभद्रश्च [illegible] महायुराः [illegible]
पिनाकी चापराजितः ॥ [illegible]
[illegible]

ग्र॰स्था वतामृडयन्नः ॥ आर्वोर्वाचीसुमतिर्ववृत्यादं॰ होश्चिद्यावरिवोवित्तरासदादित्या

३१ स्त्वा। धात्रादिद्वादशादित्येभ्यः स्वाहा ॥१॥ यस्मात्वन्नश्चभूयां॰ सश्च दिशो

विन्निथ्विरे ॥ तेषां॰ सहस्रयोजनेवधन्वानितन्मसि ॥ वीरभद्राद्येकादशरुद्रेभ्यः स्वाहा ॥१॥

गौरीर्मिमाय सलिलानि तक्षती। गौर्यादिषोडशमातृभ्यः स्वाहा ॥१॥ मरुतो यस्य हि क्षये पाथा

दिवो विमहसः। स सुगोपातमो जनः। आवहादिसप्तमरुद्भ्यः स्वाहा ॥१॥ ॥ अथ विना

यकादिषट् ॥ गणानां त्वेति गणपतिम्। गणानां त्वा गणपतिं॰ हवामहे प्रियाणां

त्वा प्रियपतिं॰ हवामहे निधीनां त्वा निधिपतिं॰ हवामहे वसो मम ॥ आहमजानि गर्भध ग्र॰

३१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मात्वमजासिगर्भधम् ॥१॥ ब्रह्मजज्ञानमितिब्रह्माराम् ॥ ब्रह्मजज्ञानंप्रथमम्पुरस्ताद्विसीम
तःसुरुचोवेनआवः । सबुध्न्याउपमाअस्यविष्ठाः सतश्चयोनिमसतश्चविवः ॥२॥ विष्णोरग
टेतिविष्णुम् । विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि ॥ वैष्णवम
सिविष्णवेत्वा ॥३॥ मानस्तोकेतिरुद्रम् ॥ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानो
ऽअश्वेषुरीरिषः ॥ मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तःसदमित्वाहवामहे ॥४॥ अ
ग्निरश्मीत्यर्कम् । अग्निरस्मिजन्मनाजातवेदाघृतंमेचक्षुरमृतंमऽआसन् । अर्कस्त्रिधा
तूरजसोविमानोजस्रोघर्मोहविरस्मिनाम ॥५॥ वनस्पतेइतिवनस्पतिम् ॥ वनस्पतेवीड्व

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ·स्था ङ्गोहि भूयाऽस्मत्सखा प्रतरणः सुवीरः ॥ गोभिः सन्नद्धोऽअसि वीडयस्वास्थाता ते जयतु जे
३२ त्वानि ॥८॥ ॥ अथ यजुः स्वस्त्यादयः ॥ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ॥ स्व
स्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥१॥ पयः पृथिव्यामिति मन्त्रः [illegible]
पयः पृथिव्यां पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः ॥ पयस्वतीः प्रदिशः सन्तु मह्यम् [illegible]
विष्णो रराटमिति विष्णुमन्त्रः ॥ विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवो
सि वैष्णवमसि विष्णवे त्वा ॥२॥ अग्निर्देवेति मन्त्राद्यादेवता ॥ अग्निर्देवता वातो देवता सूर्यो देव
ता चन्द्रमा देवता वसवो देवता रुद्रा देवता दित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्प अ·स्था

३२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तिर्द्देवतेन्द्रो देवता वरुणो देवता ॥४॥ द्यौः शान्तिरितिद्वादश शान्तिम् । द्यौः शान्तिरंतरिक्षꣳ
शान्तिः पृथिवी शान्तिरापः शान्तिरोषधः शान्ति र्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म
शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥५॥ प्रातरग्निमितिषट् प्रातर
प्रातरग्निं प्रातरिन्द्रꣳ हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ॥ प्रातर्भगम्पूषणं ब्रह्मण
स्पतिम्प्रातः सोममुत रुद्रꣳ हुवेम ॥६॥ समुद्रायत्वेति षड्वातान् ॥ समुद्राय त्वा वाता
स्वाहा सरिराय त्वा वाताय स्वाहा । अनाधृष्याय त्वा वाताय स्वाहा प्रतिधृष्याय त्वा वाताय
स्वाहा । अवस्यवे त्वा वाताय स्वाहा शिमिदाय त्वा वाताय स्वाहा ॥७॥ अनड्वान्वयेति अनड्वान् ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ.स्था. अनड्वान्वयः पंक्तिश्छंदो धेनुर्वयो जगतीछन्दस्त्र्यविर्वयस्त्रिष्टुप्छंदो दित्यवाड्वयो विराट्छ
न्दः पंचाविर्वयो गायत्रीछंदः त्रिवत्सो वय उष्णिकछंदस्तुर्यवाड्वयोनुष्टुप्छंदो लोकन्ताऽ
३२ इन्द्रम् ॥८॥ भगएवेतिपंचभगान् । भगऽएवभगवाँऽ२ अस्तुदेवास्तेनवयम्भगवन्तःस्या
म ॥ तन्त्वाभगसर्वऽइज्जोहवीतिसनोभगपुरऽएताभवेह ॥९॥ प्राणायस्वाहेतिपंचेन्द्रिया
न् । प्राणायस्वाहापानायस्वाहाव्यानायस्वाहाचक्षुषेस्वाहाश्रोत्रायस्वाहावाचेस्वाहाम
नसेस्वाहा ॥१०॥ वरुणस्योत्तम्भनमसीतिपंचवरुणान् । वरुणस्योत्तम्भनमसि वरुणस्य
स्कम्भसर्जनीस्थो वरुणस्यऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमा

३२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिद ॥११॥ गायत्री त्रिष्टु वितिगायत्रीम् । गायत्री त्रिष्टु ब्जगत्यनुष्टु ब्पंक्त्यासह । बृहत्युष्णि
हाककुप्सूचिभिः शम्यन्तुत्वा ॥ १२ ॥ उपयामगृहीतोसीतिसावित्रीम् । उपयामगृहीतोसिसा
वित्रोसिचनोधाश्चनोधाअसिचनोमयिधेहि । जिन्वयज्ञं जिन्वयज्ञपतिंभगायदेवायत्वा
सवित्रे ॥ १३ ॥ सरस्वतीयोन्यामितिसरस्वतीम् । सरस्वतीयोन्याङ्गर्भमन्तरश्विभ्यांपत्नीसुकृतं
विभर्त्ति । अपांरसेनवरुणोनसाम्नेन्द्रंश्रियैजनयन्नप्सुराजा ॥ १४ ॥ गृहामेतिगृ
हमालरम् ॥ गृहामाविभीतमावेपध्वमूर्जम्बिभ्रमत । एमसिऊर्जम्बिभ्रद्वः सुमनाः सुमे
धागृहानैमिमनसामोदमानः ॥ १५ ॥ अन्नपतेन्नस्येतिअन्नपूर्णाम् । अन्नपतेन्नस्यनो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अ. स्था. देह्यनमीवस्यशुष्मिणः। प्रप्रदातारंतारिषऊर्ज्जंनोधेहिद्विपदेचतुष्पदे ॥१६॥ श्रीस्व
३४ तेतिमहालक्ष्मीम् ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्या
त्तम्। इष्णन्निषाणामुम्म ऽइषाणसर्वलोकम्म ऽइषाण ॥१७॥ देवीर्द्वारमितिमहाश्रियविना
शिनीम्। देवीर्द्वार ऽइन्द्र ८ संघातेवीड्वीर्यामन्नवर्द्धयन्। आवत्सेनतरुणेनकुमारेणच
मीवतापार्वाणः ८ ऐरणुककाटन्नुदंतांवसुवनेवसुधेयस्यव्यन्तुयज ॥१८॥ अम्बे ऽ म्बि
इतित्रिवाडीम्। अम्बे ऽ अम्बिके ऽ म्बालिकेनमानयतिकश्चन। ससस्त्यश्वकः सुभद्रिका
काम्पीलवासिनीम् ॥१९॥ घोरासीदितिघोराणिम्॥ घोरासीत्पूर्व्वचित्तिरश्व ऽ आसीद्बृ
३४

CC-0. Digitized by eGangotri and MIDF- Delhi

ह्वय: ॥ अविरासीत्पिलिपिला रात्रिरासीत्पिशङ्गिला ॥२०॥ वसो: पवित्रमसीति वास्तुदेव
म् ॥ वसो: पवित्रमसि द्यौरसि पृथिव्यसि मातरिश्वनो घर्मोसि विश्वधा असि । परमेणधा
म्ना दृंहस्व माह्वार्माते यज्ञपतिर्ह्वार्षीत् ॥२१॥ भूम्या आखून्निभूम्यादेवम् ॥ भूम्या:
आखूनालभतेन्तरिक्षाय पाङ्क्त्रान्दिवे कशान्दिग्भ्यो नकुलान्बभ्रुकानवान्तरदिशाभ्य:
॥२२॥ नम: शंभवायेति गेडुम् । नम: शंभवाय च मयोभवाय च नम: शंकराय च मय
स्कराय च नम: शिवाय च शिवतराय च ॥२३॥ क्षत्रस्य योनिरिति सत्रपालम् ॥ क्षत्रस्य यो
निरसि क्षत्रस्य नाभिरसि ॥ मा त्वा हिंसीन्मा मा हिंसी: ॥२४॥ यद्ग्रामेरति ग्रामदेवम् ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ·स्था यद्ग्रामेयदंरण्येयत्सभायांयदिन्द्रिये। यदेनश्चकृमावयमिदन्तद वयजामहे स्वाहा॥२५॥
३५ त्रातारमिन्द्रेतिस्वर्गेन्द्रम्॥त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम्
॥ह्वयामिशक्रंपुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः॥२६॥नमोस्तुसर्पेभ्यइतिया
तालवाशुकिम्।नमोस्तुसर्पेभ्योयेकेचपृथिवीमनु।येअंतरिक्षेयेदिवितेभ्यःसर्पेभ्यो
नमः॥२७॥मित्रोनऽएहीतिमित्रलोकम्।मित्रोनःएहिसुमित्रधऽइन्द्रस्योरुमाविशद
क्षिणामुशन्नुशन्तꣳस्योनःस्योनं।स्वानभ्राजाङ्घारेबम्भारेहस्तसुहस्तकृशानवेते
वःसोमक्रयणास्तान्रक्षध्वमावोदभन्॥२८॥राजन्नमध्वराणामितिमान्धातारम्।राज ३५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्नमध्वराणाङ्गोपामृतस्यदीदिविम्। वर्द्धमानꣳ स्वेदमे॥२९॥ येतीर्थानीति तीर्थराजम्। ये
तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः। तेषाꣳ सहस्रयोजनेवधन्वानितन्मसि॥३०॥ व्रते
नदीक्षेति व्रतराजम्॥ व्रतेन दीक्षामाप्नोति· दीक्षयाप्नोति दक्षिणाम्। दक्षिणा श्रद्धामाप्नो
ति श्रद्धयासत्यमाप्यते॥३१॥ प्राच्यै दिशे स्वाहेति पुनर्दिक्वालान्। प्राच्यै दिशे स्वाहार्वाच्यै
दिशे स्वाहा· दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा· प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदी
च्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोर्द्ध्वायै दिशे स्वाहार्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहार्वाच्यै
दिशे स्वाहा·॥३२॥ अग्नेः पक्षतिरिति तिथिः॥ अग्नेः पक्षतिर्वायोर्निपक्षतिरिन्द्रस्यतृ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अ॰स्था गीयासोमस्यचतुर्थ्यादित्यैपंचमीन्द्राग्न्योषष्ठीमरुतांसप्तमीवृहस्पतेरष्टम्यर्यम्णोनवमीधा
२६ तुर्दशमीन्द्रस्यैकादशीवरुणस्यद्वादशीयमस्यत्रयोदशी॥२३॥नक्षत्रेभ्यइतिनक्षत्राणि।नक्ष
त्रेभ्यः स्वाहानक्षत्रियेभ्यः स्वाहाहोरात्रेभ्यः स्वाहार्द्धमासेभ्यः स्वाहामासेभ्यः स्वाहा ऋतुभ्यः
स्वाहार्त्तवेभ्यः स्वाहासम्वत्सरायस्वाहाद्यावापृथिवीभ्यां स्वाहाचंद्रायस्वाहासूर्यायस्वाहा
रश्मिभ्यः स्वाहावसुभ्यः स्वाहारुद्रेभ्यः स्वाहादित्येभ्यः स्वाहामरुद्भ्यः स्वाहाविश्वेभ्योदेवेभ्य
ः स्वाहामूलेभ्यः स्वाहाशाखाभ्यः स्वाहा॰वनस्पतिभ्यः स्वाहापुष्पेभ्यः स्वाहाऔषधीभ्य
ः स्वाहा॥२४॥योगेयोगेतियोगान्॥ योगेयोगेतवस्तरंवाजेवाजेहवामहे।सखायइन्द्र
२५

CC-0. Digitized by eGangotri and MIDF- Delhi

५ वायो येते सहस्रिणो रथास्तेभिरागहि । नियुत्वा सोमपीतये ।

मूनये ॥ २५ ॥ आदित्यङ्गर्भमिति वासरान् । आदित्यङ्गर्भम्पयसा समङ्ग्धि सहस्रस्य प्रति
मां विश्वरूपम् । परिवृङ्ग्धि हरसा माभिमं ऽस्थाः शतायुषं कृणु हि चीयमानः ॥ २६ ॥ भद्रं
कर्णेभिरिति करणान् ॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ॥ स्थिरैर
ङ्गैस्तुष्टुवां ऽसस्तनूभिर्व्यशेम हि देवहितं यदायुः ॥ २७ ॥ वायो येतेइति वातान् । वातो
वा मनो वा गंधर्वाः सप्तविंशतिः ॥ ते ऽअग्रेश्वमयुञ्जस्ते ऽअस्मिञ्जवमादधुः ॥ २८ ॥ वा
तायस्वाहेति मेघान् । वाताय स्वाहा धूमाय स्वाहाभ्राय स्वाहा मेघाय स्वाहा विद्योतमा
नाय स्वाहा स्तनय स्वाहावस्फूर्जते स्वाहा वर्षते स्वाहाववर्षते स्वाहोग्रं वर्षते स्वाहा शीघ्रं व
ते ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्र·स्था धीनेस्वाहोद्रह्लानेस्वाहोद्गृहीतायस्वाहाप्रुष्मतेस्वाहाशीकायनेस्वाहाप्रुष्वाभ्यःस्वाहाह्रादुनीभ्यः
३७ स्वाहानीहारायस्वाहा॥३९॥समुद्रंगछ्छेतिसमुद्रान्।समुद्रंगछ्छस्वाहान्तरिक्षंगछ्छस्वाहादेवंसव
वितारंगछ्छस्वाहामित्रावरुणौगछ्छस्वाहाहोरात्रेगछ्छस्वाहाछन्दांसिगछ्छस्वाहाद्यावापृथिवीग
छ्छस्वाहायज्ञंगछ्छस्वाहासोमंगछ्छस्वाहादिव्यन्नभोगछ्छस्वाहाग्निंवैश्वानरंगछ्छस्वाहा।मनोमेहार्दि
यछ्छदिवंतेधूमोगछ्छतुस्वर्ज्योतिःपृथिवींभस्मनापृणस्वाहा॥४०॥नदीभ्यःपौञ्जिष्टेतिनदीःन
दीभ्यःपौञ्जिष्टंमृक्षिकाभ्योनैषादंपुरुषव्याघ्रायदुर्मदंगन्धर्वाप्सरोभ्योव्रात्यंप्रयुग्भ्यःउ रू
न्मत्तंसर्पदेवजनेभ्योप्रतिपदमयेभ्यःकितवमीर्यतायाअकितवंपिशाचेभ्योविदलकारींया ३७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तुधानेभ्यः करटकीकारीम् ॥४१॥ इष्टोयज्ञेतिइष्टदेवम् ॥ इंष्टोयज्ञोभृगुभिराशीर्दावसुभिः
तस्यनऽइष्टस्यप्रीतस्यद्रविणेहागमे ॥४२॥ कुलायिनीतिकुलदेवम् । कुलायिनी घृत
वतीपुरन्धिःस्योनेसीदसदनेपृथिव्याः ॥ अभित्वारुद्रावसवोगृणन्त्विमाब्रह्मपीपिहि
सौभगायाश्विनाध्वर्यूसादयतामिहत्वा ॥४३॥ यत्रस्थापितोयोदेवस्तन्मन्त्रेणाहुतीम
येत् ॥ नमःशम्भवायेतिभैरवम् ॥ नमः४शंभवायचमयोभवायचनम४शंकरायच
मयस्करायचनमःशिवायचशिवतरायच ॥४४॥ देवीर्द्वारेतिभैरवीम् । देवीर्द्वा
ऽ संघातेवीड्व्यामन्नवर्द्धयन्न । आवत्सेनतरुणेनकुमारेणचमीवतापार्वाणं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्र· स्था· गुकक्काटन्तुदृतोवसुवनेवतुधेयस्यान्नुयज ॥४५॥ अम्बेअम्बिके [illegible]
३८ । अम्बेअम्बिके म्बालिकेन मानयतिकश्चनासससत्यश्वकः सुभद्रिकां [illegible]
नीम् ॥४६॥ यत्रस्थानविशेषादि [illegible] देवैर्धान [illegible] होमयेत [illegible]
पंचपाराडवम् । उग्रश्चभीमश्च [illegible] निश्चसा [illegible] विभिन्नरा [illegible]
४७॥ पितृभ्यः इति पितरं ॥ पितृभ्यः स्वधायिभ्यः ॥ स्वधानमः पितामहेभ्यः स्वधा [illegible]
स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः । अक्षन्नपितरोमीमदन्त पितरो [illegible]
न्नृपन्तपितरः पितरः शुन्धध्वम् ॥४८॥ [illegible] [illegible]

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वानस्वैश्वालरसूर्तस्यज्योतिषस्पतिम्। अजस्त्रङ्घर्ममीमहे। उपयामगृहीतोसि वैश्वा
त्वैषतेयोनिर्वैश्वानरयत्वा॥४९॥एषोहदेवेतिसर्वदेवम्। एषोहदेवःप्रदिशोनुसर्वाः
र्वोहजातःसऽउगर्भेऽअन्तः॥सएवजातःसजनिष्यमाणः प्रत्यङ्जनास्तिष्ठतिसर्वतो
॥५०॥शुक्रज्योतिरितिसर्वहोमधूरसार्योहोमः। शुक्रज्योतिश्चचित्रज्योतिश्चसत्यज्योति
तिष्मांश्च। शुक्रश्चऋतपाश्चात्यꣳहाः॥५॥ततःस्रुवपूजनम्। स्रुवंवस्त्रेनिधाय।
शृंगाःस्रुवम्मेतिफलपुष्पादिनास्रुवंपूजयेत्।चत्वारिशृंगात्रयोअस्यपादा
हस्तासोअस्य।त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याꣳआविवेश॥१॥स्रुवपूजनम

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

प्र·स्था श्चमेबायव्यानिचमेद्रोणकलशश्चमेग्रावाणश्चमेऽधिषवणश्चमेपूतभृच्चमआध

२८ दिश्चमेबर्हिश्चमेवभृथश्चमेस्वगाकारश्चमेयज्ञेनकल्पंताम्॥ ततः पूर्णाहु

हुतिः मूर्द्धानंदिवोऽअरतिम्पृथिव्यावैश्वानरमृत आजातमग्निम् कविर्ँ

सम्राजमतिथिञ्जनानामासन्नापात्रंजनयन्तदेवाः॥ ततः पूर्णपात्रदानम्॥ अद्येह

मेहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्रजाप

मगोत्राय· यथानामशर्मणेब्राह्मणायब्रह्मणेतुभ्यमहंसंप्रददे॥ इतिपूर्णपात्रदान

नाविमोः। सुमित्रियानपवित्राभ्यांशिरःसंमृज्य। सुमित्रियानऽआपओषधयःसन्तु।

CC-0. Digitized by eGangotri and MIDF- Delhi

इतिईशानांप्राशितान्मुखंकुर्यात् ।इदंमिवित्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चवयंद्विष्मः
॥४॥ ततस्तरणावर्हिस्तत्स्थाप्य आज्येनाभिघार्य्य । ओंदेवागातुविदोगाति [illegible]
ग्नौजुहुयात् ।देवागातुविदोगातुंवित्वागातुमित ।मनसस्पतइमन्देव [illegible]
स्वाहावातेधाः॥५॥ ॥ततोमेधा॥सदसस्पतिमद्भुतम्प्रियमिन्द्रस्यका [illegible]
मेधामयासिव ॐ स्वाहा॥१॥यांमेधान्देवगणाः पितरश्चोपासते॥ [illegible]
द्यमेधयाग्नेमेधाविनङ्कुरुस्वाहा॥२॥इदंमेब्रह्मचक्षत्रश्चोभेश्रिय [illegible]
मयिदेवादधतुश्रियमुत्तमान्तस्यैतेस्वाहा॥३॥आकूतिमग्निंप्रयुजं [illegible]

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ॰स्वा नोमेधामग्निंप्रभुज ॐ स्वाहा विभ्रंविज्ञानमग्निंप्रभुज ॐ स्वाहाब्राह्मे [illegible]
४० मग्निंप्रभुज ॐ स्वाहाप्रजापतयेमनवेस्वाहाग्नयेवैश्वानराय स्वाहा ॥ [illegible]
न्तेविश्वभुवनमधिश्रितमंतःसमुद्रेहृद्यंतरायुषि। अपामनीके समिथे [illegible]
तस्तमश्याममधुमंतंतऊर्मिम्॥५॥ पुनस्त्वादित्यारुद्रावसवःसमिंधतां [illegible]
ह्माणोवसुनीथयज्ञैः। घृतेनत्वंतन्वंवर्द्धयस्वसत्याःसंतुयजमानस्य [illegible]
६॥ इतिमेधा॥ ॥ततोयजमानेनवैश्वानरपूजनम् फलवस्त्रादिना॥ [illegible]
धीनिवस्त्रहोमम्॥ एधोस्येधिषीमहिसमिदसितेजोसमयिधेहिसमाववर्त्ति [illegible] ४०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

थिवीसमुद्राः समुद्रसूर्यः। सम विश्वमिदं जगत्। वैश्वानरज्योतिर्भूयासं विभून्कामान्व्य
श्नवै भूः स्वाहा॥ १॥ अभ्यादधामीति आयुष्यकरणम्। अभ्यादधामि समिधमग्ने
व्रतपते [illegible] श्रद्धां च मेधां च जातवेदः ॥ ३॥ त्र्यायुषं जमदग्नेः [illegible]
टे। कश्यपस्य त्र्यायुषमिति ग्रीवायाम्। यद्देवेषु त्र्यायुषमिति दक्षिणबाहु [illegible]
ऽस्तु त्र्यायुषमिति हृदि॥ ३॥ ततो रक्षाबंधनम्। येन बद्धो बली तिरक्षा [illegible]
येन बद्धो बली राजा दानवेन्द्रो महाबलः। तेन त्वां प्रतिगृह्णामि रक्षे मा चल मा चल
॥४॥ ॥ ततो घृतच्छायादर्शनम्॥ रूपवानसीति। रूपवासि ध रूपाणा रूपाणि विश्वकर्मणा॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्या मालासमुद्रउद्धृधीन्मातुपर्णो ऽयमानापृथिवीहं ८ं हं ॥१॥ अलक्ष्मीर्यच्चदोषं
५१ सर्वगात्रेषुवस्थितम्॥ तत्सर्वंनाशमयाज्यत्वंलक्ष्मीपुष्टिंचवर्द्धय ॥ आज्यंतेजस
मुद्दिष्टमाज्यंपापहरंशुभम्॥ आज्येनदेवास्तृप्यंतिआज्येलोकाः प्रतिष्ठिताः॥
संभौमंचान्तरिक्षंयन्मेकल्मषमागतम्॥ सर्वंतदाज्यसंस्पर्शात्प्रणाशमुपगच्छ
तु॥ इतिघृतच्छायाविधिः॥ ॥ ततस्तद्दर्शनावसरे ॥ तेजोसीतिपरमेष्ठीऋषिराज्य
देवता गायत्री छन्द आज्यावेक्षणे विनियोगः॥ ॐ तेजोसीतिघृतच्छायांपश्येत्॥ तेज
सिशुक्रममृतमायुष्पाऽआयुर्मेपाहि॥ देवस्यत्वासवितुः प्रसवेऽश्विनोर्बाहुभ्यां

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ष्मोहस्तां ब्राह्मणायाददे॥१॥ततः अद्येहेत्यादि देशकालौ संकीर्त्य पापक्षयपूर्वदीर्घायुरा
रोग्यावाप्त्यर्थं इदमाज्यमवलोकितं पात्रसहितं पात्रनिष्क्रयीभूतद्रव्यसहितं नाम
जयप्रीतये आचार्याय तुभ्यमहं संप्रददे। इति संकल्पदानवाक्यं पठेत्॥ का...
समुद्भूतं देवानाममृतमं हविः॥ आयुर्वृद्धिकरं दानं राज्यं दानं सदैव मे॥ छायादर्श
नम्· पापनाशनम्। अरिष्टं हन्तु· इति घृतछायादर्शनविधिः॥ ॥अथ...
दित्यायगोदानं॥गोपूजनमंत्रः॥यज्ञसाधनभूताया पविश्वस्याघनाशिनी॥...
पधरा देवः श्रीयतां मुनयोगवे॥ गवामंगेषु तिष्ठंति भुवनानि चतुर्दश॥यस्मा...

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ॰ स्था॰ द्विवंमेस्यादिहलोकेपरत्रच। इरावती धेनुमती हिभूतं ८ सूयवसिनी मनवे दशस्याः
४२ । व्यस्कभ्नारोदसीविष्णवेतेदाधर्थपृथिवीमभितोमयूखैः स्वाहा॥ इतिपाद्यवस्त्रादि
भिः संपूज्य। मनोमेतर्पयतइतिपुष्पोदकेनात्मानंसंतर्प्य। मनोमेतर्प्पयतवाचंमे
तर्प्पयत। प्राणंमेतर्पयतचक्षुर्मेतर्पयतश्रोत्रंमेतर्प्पयतात्मानंमेतर्पयतप्र
जांमेतर्प्पयतपशून्मेतर्प्पयतगणान्मेतर्प्पयतगणामेमावितृषन्॥ आकृष्णे
तिपाद्यादिभिर्ब्रह्माणंसंपूज्य। आकृष्णेनरजसावर्त्तमानो निवेशयन्नमृतंम
र्त्यञ्च॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्॥ कुशादिसहितं ४२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुच्छमादाय। ॐ अद्येह· इत्यादि संकल्पं कुर्यात् ततो ब्राह्मणहस्ते दत्वा॥ गोप्रार्थनं कु
र्यात्॥ कपिले सर्वदेवानां पूजनीयासि रोहिणी॥ तीर्थदेवमयी यस्मात्तस्माच्छान्तिं
प्रयच्छ मे॥ ततो दानप्रतिष्ठा॥ १॥ सोमाय शंखदानम्॥ प्रतिश्रुत्काया अर्त्तनमि
ति पाद्यादिभि ॐ शंखं संपूज्य। प्रतिश्रुत्काया॰ अर्त्तनं घोषाय भषमन्ताय बहुवा
दिनमनन्ताय मूकं॰ शब्दायाडम्बराघातम्महसे वीणावादं क्रोशाय तूणवध्मम
स्परायशंखध्मं वनाय वनपमन्यतोरण्याय दावपम्॥ इमं देवेति ब्राह्मणाय स
पूज्य। इमं देवा॰ असपत्न॰ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्याये

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग·स्था न्द्रस्येन्द्रियाय। इममसुष्यपुत्रममुष्येपुत्रमस्यै विषएषवोमीराजा सोमोस्माकंब्रा
४२ ह्मणानां७राजा॥ कुशोदकेनशंखमभ्युक्ष्य संकल्पंकुर्यात्॥ शंखप्रार्थना॥ पुराएपत्नं
शंखपुरापानांमंगलानांचमंगलं॥ विष्णुनाविधृतोनित्यमतः शांतिंप्रयच्छमे॥॥
दानप्रतिष्ठा॥१॥ ओंकारकायरक्तं अनडुहं॥ अनड्वान्वयः पंक्तिश्छंदो धेनुर्वयोज
गतीछंदस्त्र्य विर्वयस्त्रिष्टुप्छंदो दित्यवाड्वयो विराट्छंदः पंचाविर्वयोगायत्रीछंद
स्त्रिवत्सोवयऽउष्णिकछंदस्तुर्यवाड्वयोनुष्टुप्छंदोलोकत्ताऽइन्द्रम्॥ अनडुत्पू
जनम्। अग्निर्मूर्द्धेतिब्राह्मणपूजनम्। अग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्याऽ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अयम्। अपा ँ रेता ँ सिजिन्वति। ककुदंगहित्वा संकल्पः। धर्मस्त्वं वृषरूपेण जग
दानन्दकारकम्। अष्टमूर्त्तेरधिष्ठानमतः शांतिं प्रयच्छ मे। दान प्रतिष्ठा॥ ३॥ कांचनं उ
धाय। हिरण्यगर्भमिति कांचन पूजनम्। हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक
आसीत्। सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ उद्बुध्यस्वेति ब्राह्मणपू
जनम्। उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते स ँ सृजेथामयं च। अस्मिन्त्सधस्थे अध्यु
त्तरस्मिन् विश्वे देवा यजमानश्च सीदत॥ कुशवारिणा भुसरां संकल्प॥ हिरण्यगर्भ
गर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदमतः शांतिं प्रयच्छ मे। दानप्रतिष्ठा॥ ४॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ·स्मा पीतवासोबृहस्पतेः॥यदश्वायवासइतिवस्त्रपूजनम्।यदश्वायवासऽउपस्तृणन्त्यधीवा
४४ सन्न्याहिरण्यान्यस्मै।सन्दानमर्वन्तम्पड्वीशाम्प्रियादेवेष्वायामयन्ति॥बृहस्पतेइतिमा
लापूजनम्।बृहस्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु।यद्दीद
यच्छवसऽऋतप्रजाततदस्मासुद्रविणन्धेहिचित्रम्।उपयामगृहीतोसिबृहस्पत
येत्वैषतेयोनिर्बृहस्पतयेत्वा॥अभ्युक्षणं।संकल्पः।पीतवस्त्रमिदंयस्माद्वासुदेवस्यदु
र्ल्लभम्॥प्रदानात्तस्यमेविष्णुरतःशांतिंप्रयच्छमे।दानप्रतिष्ठा॥५॥शुक्रायश्वेताश्वं कृष्ण
अश्वस्तूपरइति अश्वपूजनम्।अश्वस्तूपरोगोमृगस्तेप्राजापत्याः॥कृष्णग्रीवऽआग्ने ४४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

योरूणटेपुरस्तात्सारस्वतीमेष्यधस्तात्द्वन्द्वौ राश्विनावधोरामौ वाहौः सौमापौष्णः श्यामोना
भ्रा ७ सौर्य्ययामो· श्वेतश्चैलक्षणस्य पार्श्वयोस्त्वाष्ट्रो लोमशसक्थौ सक्थ्यौ वायव्यः
श्वेतः पुच्छ ऽइन्द्राय स्वपस्याय वेहद्वैष्णवो वामनः॥ अन्नात्परिस्रुत इति ब्राह्मणपूजन
।अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियं वि
पानं ८ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु। अभ्युक्षणं॥ कर्णं गृहीत्वा संक
ल्पः॥ प्रार्थना। महार्णवे समुत्पन्न उच्चैः श्रवस सुव्रतक॥ मयात्वं विप्रमुख्याय दत्तो ह
य सुखी भव। दानप्रतिष्ठा॥ द॥ कृष्णा गौ ऽशानेश्वराय। इरावती धेनुमती· इति पूजनम्॥॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ·स्था शन्नोदेवीरिति ब्राह्मणपूजनम्। शन्नो देवीरभिष्टय॰ आपोभवंतुपीतये॥ शंय्योरभिस्रवन्तुन
८५ ॥ अभ्युक्षणं [illegible] द्दु गृहीत्वा संकल्प॥ यस्मात्त्वं पृथिवींसर्वांधेनुकेशवदुर्द्धभां॥ प्रदाना
न्नतस्यमेसोरितः॥ शान्तिंप्रयच्छमे। दानप्रतिष्ठा॥ ७॥ खड्गाहवे। खड्गोवैश्वदेवेतिपूजनम्
। खड्गोवैश्वदेवः श्वाकृष्णः कर्णोगर्दभस्तरक्षुस्तेरक्षसामिन्द्राय सूकरः सिंहो मारुतः
कृकलासः पिप्पका शकुनिस्तेशरव्या ॰ येविश्वेषान्देवाना मृषतः॥ कयानश्चित्रेति ब्राह्म
पूजनम्। कयानश्चित्र॰ आभुवदूतीसदावृधः सखा॥ कयाशचिष्टयावृता॥ अभ्युक्षणं। रु·
मुष्टिं गृहीत्वा संकल्प॥ खड्गधारे महादेवी दैत्यसैन्यविनाशिनी। हेलोहलांगलादीनिम ८५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मरक्षांकरोतु मे।। दानप्रतिष्ठा ॥८॥ छागंकेनवे। एषछागेति छागपूजनम्॥ एषछागः पुरोऽश्व
श्वेन वाजिनापूष्णो भागोनीयते विश्वदेव्यः। अभिप्रियन्यत्पुरोडाशमर्वतात्वष्टेदेन ८· सोश्रवसा
यजिन्वति। केतुंकृण्वन्निति ब्राह्मणपूजनम्। केतुंकृण्वन्नकेतवे पेशोमर्या अपेशसे। समुष
द्भिरजायथाः॥ अभ्युक्षणं। नाभिंगृहीत्वा संकल्पः। यस्मात्त्वं छाग यज्ञानामंगत्वेन व्यवस्थितः
प्रदानं तस्य मे केतुरग्नः शांतिंप्रयच्छ मे। दानप्रतिष्ठा ॥९॥ गोदानम्। भूमिदानं। रत्नदानम्॥
सुवर्णदानम्। रौप्यदानम्। वस्त्रदानम्। दशधेनुदानम्। ब्राह्मणभोजनम्। ब्राह्मणाशि
षग्रहणम्। ततः कर्त्ता बन्धुवर्गैः सहभोजनम्॥ ॥इतिसाधारणहोमपद्धतिः सम्पूर्णम्॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

५८

धारण होम ५८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi